नवमः पाठः

# रघुवंशम्

*महाकवि कालिदासकृत महाकाव्य 'रघुवंशम्' के प्रथम सर्ग से यह पाठ लिया गया है। इस काव्य में राजा दिलीप से लेकर अग्निवर्ण तक इक्ष्वाकुवंशीय राजाओं का वर्णन किया गया है।*

QSCJPU



वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।। 1।।

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव।। 2।।

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।। 3।।

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।। 4।।

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।। 5।।

द्वेष्योपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ।। 6।।

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।। 7।।

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम्।। 8।।

हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।। 9।।

## शब्दार्थाः

| | | |
|---|---|---|
| वैवस्वतः | – | वैवस्वत (सूर्य पुत्र) |
| मनीषिणाम् | – | विद्वानों का, विद्वानों में |
| महीक्षिताम् | – | राजाओं का, राजाओं में |
| प्रणवः | – | ओंकार |

| | | |
|---|---|---|
| छन्दसाम् | – | वेदमन्त्रों का, वेदमन्त्रों में |
| तदन्वये | – | उसके वंश में |
| शुद्धिमति | – | पवित्र बुद्धिवाले में |
| प्रसूतः | – | उत्पन्न हुआ |
| राजेन्दुः | – | राजाओं में चन्द्रमा |
| क्षीरनिधौ | – | समुद्र में |
| आकारसदृशप्रज्ञः | – | आकार के अनुरूप बुद्धिवाला |
| आगमः | – | शास्त्रज्ञान |
| भूत्यर्थम् | – | सुखसमृद्धि के लिए |
| बलिम् | – | कर |
| उत्स्रष्टुम् | – | देने के लिए, छोड़ने के लिए (उत् + सृज् + तुमुन्) |
| विनयाधानात् | = | शिक्षा देने के कारण |
| द्वेष्यः | – | द्वेष करने योग्य, शत्रु |
| उरगक्षता | – | साँप द्वारा काटी गई |
| दाक्षिण्यरुढेन | – | अधिक निपुण होने के कारण |
| अध्वरस्य | – | यज्ञ की |
| अभ्यर्च्य | – | पूजा करके |
| विधातारम् | – | ब्रह्म को |
| प्रयतौ | – | पवित्र |
| जग्मतुः | = | चले गए |
| हैयङ्गवीनम् | – | मक्खन को |
| घोषवृद्धान् | – | वृद्ध ग्वालों से |
| शाखिनाम् | – | वृक्षों का (शाखिन्, षष्ठी बहु.) |

## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) महीक्षिताम् आद्यः कः आसीत् ?

(ख) वैवस्वतस्य मनोः वंशे कः प्रसूतः ?

(ग) स प्रजाभ्यो बलिं किमर्थं गृहीतवान् ?

(घ) दिलीपस्य पत्नी का आसीत् ?

(ङ) तौ दम्पती कुत्र जग्मतुः ?

**2. उपयुक्तं पदं चित्वा रिक्तस्थानानि पूरयत –**

(क) आकारदृशप्रज्ञः ..............................सदृशागमः । (विद्यया, शीलेन, प्रज्ञया)

(ख) सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं.............................. । (रविः कविः हविः)

(ग) अथाभ्यर्च्य.............................. प्रयतौ पुत्रकाम्यया। (विधातारम्, गणाधीशम्)

(घ) .............................. धेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् (नाम, भाग)

**3. उदाहरणमनुसृत्य वाक्यानि रचयत ।**

**यथा** – दीपायै केवलं फलं रोचते।

दुष्टः, आदाय, त्याज्य, दम्पती, प्रजानाम्

**4. सन्धिं/विच्छेदं कुरुत ।**

मनुर्नाम =

राजेन्दुरिन्दुः =

सुदक्षिणेत्यासीत् =

पितरस्तासाम् =

शिष्टः + तस्य + आर्तस्य =

अध्वरस्य + एव =

गुरोः +जग्मतुः + आश्रमम् =

**5. अधोलिखितानां पदानां पर्यायपदं लिखत ।**

(क) इन्दुः ..................

(ख) प्रज्ञा ..................

(ग) दुष्टः ..................

(घ) पत्नी ..................

(ङ.) अध्वरः ..................

(च) विधाता ..................

**6. श्लोकानां भावार्थं मातृभाषया लिखत।**

## योग्यताविस्तारः

### अन्वय और हिन्दी भावार्थ

**1. मनीषिणां माननीयः वैवस्वतः नाम मनुः छन्दसां प्रणवः इव महीक्षिताम् आद्यः आसीत्।**

विद्वानों के सम्माननीय वैवस्वत मनु वेदों में ऊँकार के समान राजाओं में प्रथम थे।

**2. शुद्धिमति तदन्वये शुद्धिमत्तरः दिलीप इति राजेन्दुः क्षीरनिधौ इन्दुः इव प्रसूतः।**

(वैवस्वत मनु के) उसके पवित्र वंश में उससे भी पवित्र राजाओं में चन्द्रमा दिलीप क्षीरसागर में चन्द्रमा के समान उत्पन्न हुए।

**3. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारम्भः आरम्भसदृशोदयः।**

वे आकार के अनुरूप बुद्धिवाले, बुद्धि के समान शास्त्र का अभ्यास करनेवाले, शास्त्राभ्यास के अनुसार उद्योग करने वाले और उद्योग के अनुसार फल को प्राप्त करनेवाले थे।

**4. स प्रज्ञानाम् एवं भूत्यर्थं ताभ्यः बलिम् अग्रहीत्, हि रविः सहस्र गुणम् उत्स्रष्टुं रसम् आदत्ते।**

प्रजा के कल्याण के लिए ही उनसे कर लेते थे जैसे सूर्य हजार गुणा जल बरसाने के लिए (पृथ्वी से) जल खींचता है।

5. **विनयाधानात् रक्षणात् भरणात् अपि सः प्रजानां पिता (अभूत्) तासां पितरः केवलं जन्महेतवः।**

शिक्षा देने से, रक्षा करने से, पालन–पोषण करने से वे प्रजा के पिता थे। उनके पिता तो केवल जन्मदाता थे।

6. **शिष्टः द्वेष्यः अपि आर्तस्य औषधं यथा तस्य सम्मतः। दुष्टः प्रियः अपि उरगक्षता अंगुलि इव त्याज्य आसीत्।**

सज्जन शत्रु भी रोगी को औषधि के समान उनको प्रिय था और दुष्ट प्रिय होने पर भी साँप से डँसी हुई अंगुलि की तरह त्याज्य था।

7. **तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना सुदक्षिणा इति अध्वरस्य दक्षिणा इव पत्नी आसीत्।**

मगध वंश में उत्पन्न, अधिक निपुण होने के कारण सुदक्षिणा नाम वाली 'दक्षिणा' नाम की यज्ञ की स्त्री के समान दिलीप की स्त्री थी।

8. **अथ पुत्रकाम्यया विधातारम् अभ्यर्च्य प्रयतौ तौ दंपती गुरोः वसिष्ठस्य आश्रमं जग्मतुः।**

उसके बाद पुत्र की इच्छा से ब्रह्मा की पूजा करके वे दोनों पवित्र पति–पत्नी कुलगुरु वसिष्ठ की आश्रम की ओर चले।

9. **हैयंगवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ (तौ जग्मतुः)।**

गाय का ताजा मक्खन लेकर उपस्थित हुए वृद्ध गोपों से जंगली वृक्षों के नाम आदि पूछते हुए (वे चले)।

QSLFRH